# MT - 172

**2013 .... .... 1200** **Seat No.** | | | | | | | |

**MT - 172 - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - PRELIM I - PAPER - IV**

**Time : 3 Hours** **(Pages 7)** **Max. Marks : 80**

**Q.I. (A) Translate *any three* of the following passages into English : 15**

(i) अनन्तरं सः अनन्तभट्टेन सह उद्याने आम्रवृक्षस्याधः दोलायामुपविष्टः । औषधानां विषये वारं वारं सोमशर्मणा पृष्टे सति अनन्तभट्टो व्याधयः कीदृशं पीडयन्ति एतत् स्पष्टीकुर्वन्नासीत्। दोलायामुपविष्टः सोमशर्मा शनैः शनैः निद्राधीनो जातः । सहसा लघ्वाघातेन जागरितः सोमशर्मा संकोचेनावदत्, ''क्षम्यताम् । निद्रापीडितोऽहं कदा सुप्तः इति न जाने । अतश्चकितोऽहम् । कृपया भवान् मम उपचारान् कथयति किम् ?''

(ii) कदाचित् सः स्वसहकारिभिः सह दूरवर्तिनं कंचन ग्रामं गतः । तत्पूर्वं कदापि स तत्र न गतवान् । ग्रामप्रवेशात् प्राक् लेरसिया आत्मानं कशाघातैः व्रणितं कृतवान् । कस्यश्चिदोषधेः अङ्गरसस्य विलेपनपि स्वशरीरे तेन कृतं यतस्तस्य शरीरमुच्छूनं रूपहीनं रुग्णमिव च दीनं समजायत । तस्योपरि तेन मृत्तिकापि लिप्ता यतः स दीनतरोऽदृश्यत । तदनु स सहकारिभिः सह तद् ग्रामं प्रविश्य मध्यचतुष्पथं यातः । तत्र ते सर्वे मार्गे समुपाविशन् ।

(iii) जिज्ञासुः विचारशीलः बालनरेन्द्रः सदैव चिन्तनमग्नः आसीत् । एकदा मात्रादिष्ट दुर्गादिव्याः मूर्तिं क्रीत्वा स गृहमागच्छत् । दुर्गापूजामहोत्सवं नाम शक्तिपूजनमिति स जानाति स्म । गृहं निवर्तमानः सः शक्तेः स्वरूपचिन्तने मग्नोऽभवत् । अकस्मात् तस्य विचारमाला खण्डिता तुरगपदानां रवेण । तेन दृष्टं यत् मण्डलाधिकारिणः अश्वयानं मार्गे वेगेन धावति इति । स्वसंरक्षणाय स मार्गाद् दूरं गन्तुं प्रायतत ।

(iv) यथा प्राचीनकाले कल्पवृक्षस्तथाऽर्वाचीनकाले अन्तर्जालमेव ज्ञानकल्पवृक्षः । निमिषमात्रेणैव मनोवाञ्छितं ज्ञानलालसा वा सम्पूर्यतेऽनेन । नानाशास्त्रकलानां ज्ञानं, वैश्विकवार्ताः, विविधसंस्थानां विभागानां च संज्ञापनं, सहस्रशः ग्रन्थाः, पर्यटनार्थमुपयुक्तज्ञानमासनारक्षणं च, दूरस्थानां दर्शनं तैश्च सह संभाषणं, सामान्यज्ञानं चेति समुपलभ्यतेऽनेन तन्त्रज्ञानेन । एष आधुनिकः कल्पवृक्षः अस्मभ्यं सर्वविधं संज्ञापनं वितरति ।

(v) अदितिः - के नाम रसाः भावाश्च ? नाट्येषु रसाभिव्यक्तिः कथं संभवति ?

आचार्या - भरतमुनिः कथयति यथा महानसे षड्रसैर्युक्तं समुचितपाकक्रियाभिः सिद्धं भोजनमास्वाद्यं भवति, नाट्ये तथैव विविधभावैर्युक्ता अभिनयसहिता कलाकृतिः

रसिकजनानां कृते आस्वादनीया मनोहारिणी च भवति । तस्मादेते विशेषभावाः नाट्यरसाः इति व्याख्याताः ।

अदितिः - कति रसाः ? कानि च तेषां नामानि ?

**Q.I. (B) Translate *any two* groups of verses into English : 8**

**Group I**

(i) तच्छ्रुत्वा तमुवाचैवं शक्रोऽथ द्विजरूपधृक् ।
यद्येवं वेत्सि तद् विद्यां विना पाठं विना श्रुतम् ॥
कस्माद् व्रतोपवासादिभिस्त्वं साधयितुमुद्यतः ।
इयं शशविषाणेच्छा व्योम्नि वा चित्रकल्पना ॥

**Group II**

(i) रक्ष पात्रगतं स्नेहं प्रदीपश्रीविवर्धनम् ।
प्रयास्यन्ति विना तेन भस्मत्वं हि भवद्गुणाः ॥

(ii) दुःखिताः परदुःखेषु निर्लोभा दुर्लभेषु च ।
विपक्षेषु क्षमावन्तः सन्तः सुकृतपादपाः ॥

**Group III**

(i) यावच्चन्द्रार्कतारादिस्थितिः स्यादम्बराङ्गणे ।
तावत्फारुकिवंशोऽसौ चिरं नन्दतु भूतले ॥

(ii) गृह्णन्तु सर्वे यदि वा यथेष्टं नास्ति क्षतिः क्वापि कवीश्वराणाम् ।
रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिन्धुः ॥

**Group IV**

(i) त्यागसुरक्तः कृषिभिर्हरितः
वैज्ञानिकयशसा च श्वेतः ।
त्रयोऽपि वर्णाः प्रदत्ताश्च यैर्ध्वजाय चास्माकम्
जयतु जवानो, जयतु किसानो, जयतु च विज्ञानम् ।
नमामि राष्ट्रध्वजं त्रिवर्णात्मकं नैकवारम्
स्मारयते मां कीर्तिकथा यो महतामनवरतम् ॥

**Q.II. (A) Answer *any two* questions in English from group I and II each :** **8**

**Group I**

(i) What is called as black gold ? How is it obtained ?

(ii) What kind of bird are seen at भरतपुर ?

(iii) With what intention did monks go to Buddha ? Why ?

**Group II**

(i) How is 'not to beg' described ?

(ii) Explain the importance of a friend.

(iii) How does the poet describe the God ?

**Q.II. (B) Complete *any two* verses of the following :** **4**

(i) ज्ञानेन ...................... महानुभावाः ॥

(ii) वंशभवो ..................... महिमानम् ॥

(iii) परोऽपि ...................... ०मौषधम् ॥

(iv) धर्मः ....................... पालय ॥

**Q.II. (C) Complete *any one* verse based on a metre :** **2**

(i) गीतिः (ii) उपेन्द्रवज्रा

**Q.III. (A) Write 5 sentences in Sanskrit on *any one* topic given below:** **5**

(i) स्वातन्त्र्यदिवसः (ii) आकाशवाणी (iii) सुभाषितम्

**OR**

**Translate *any five* sentences in Sanskrit :**

(i) Her acting appears artificial.

(ii) Tell your brother's name.

(iii) We will sit in the shadow of the tree.

(iv) Lion is the king of beasts.

(v) River water is clean.

(vi) When will you go to a village ?

(vii) Tell the story of cunning jackal.

(viii) Army chief arranges the array.

**Q.IV. (A) Rewrite the following sentences according to the order : 5**

(i) तत्र वर्तते नयनरम्यः चित्ताकर्षकः करमरकर-शिल्पालयः ।

(ii) ग्रामेऽस्मिन् पाण्डुरङ्गकरमरकरनाम्नः कृषीवलस्य सङ्गीत-चित्र-कलादिभिः परिपूर्णं, शान्तिसुखयोः निधानमेव गृहमासीत् ।

(iii) समुद्रं निकषा एवाध्युषितं प्रकृतिरम्यस्थलं ननु ।

(iv) नैतत् केवलं ग्रामभूषणं परं कलावतां तथैव कला रसिकानां कृते पण्ढरपुरमिव तीर्थक्षेत्रम् ।

(v) अस्ति कोङ्कणप्रदेशे रायगडजनपदे कश्चिद् ग्रामः सासवणेनाम ।

**OR**

**(B) Answer *any five* question in Sanskrit :**

(i) अर्वाचीनमहाराष्ट्रस्य भाग्यरेषा का ?

(ii) ग्रामव्यवस्थापननिरीक्षणार्थं कः आगतः ? तेन किं कृतम् ?

(iii) पिकाः कुत्र वर्तन्ते ?

(iv) बौद्धविहारः कुत्रासीत् ?

(v) 'जयतु विज्ञानम्' इति वक्तुं कवयित्रीं का मुखरयते ?

(vi) फारुकी-कुलावतंसः कः ?

(vii) आर्येषु सङ्गतं कथं भवति ?

(viii) धर्मस्य मूलं किम् ?

**Q.V. (A) Translate *any one* unseen passage / dialogue into English : 5**

(i) प्रतियोगिताप्रधानमिदं युगम् । जीवने विकासाय प्रतियोगितानां महती उपादेयता वर्तते । मानवः प्रतिस्पर्धया एव उन्नतिपथमारोहति । प्रायशः ये गुणाः बालकेषु सुप्तरूपेण विद्यन्ते, तेषां विकासाय प्रतियोगिताः अनिवार्याः एव । यदा बालाः छात्रजीवने अनेकासु प्रतियोगितासु सहभागिनः भवन्ति, यथा भाषण-निबन्धलेखन-चित्ररचना-वाद-विवाद-क्रीडादीनां प्रतियोगिताः, तदा एताभिः तेषां क्षमतानां विकासः भवति । अतः जीवने सर्वाङ्गीणविकासाय प्रतियोगितासु सहभागः ग्रहीतव्यः ।

(ii) दरिद्रः – राजन् ! शिवस्य मरणं वर्षशतकात् पूर्वमारब्धमासीत् । अधुना अचिरमेव समाप्तिम् अगच्छत् ।

राजा – आश्चर्यम् ! कथं तत् सम्भवम् ?

दरिद्रः – श्रुणोतु राजन् ! स किल हरिहररूपः । अतः अर्धं शरीरं हरिः अर्थात् भगवान् विष्णुः अहरत् ।

राजा – अन्यत् अर्धम् ?

दरिद्रः – स पुनः अर्धनारीश्वरः अपि तस्मात् अन्यदर्धं पार्वतीदेवी अनयत् ।

(iii) (प्रविश्य मृन्मयूरहस्ता)

तापसी - सर्वदमन, शकुन्तलावण्यं प्रेक्षस्व ।

बाल - (सदृष्टिक्षेपम्) कुत्र वा मम माता ।

उभे - नामसादृश्येन वञ्चितः मातृवत्सलः ।

द्वितीया - वत्स, अस्य मृत्तिकामयूरस्य रम्यत्वं पश्य इति भणितः असि ।

राजा - (आत्मगतम्) किंवा शकुन्तला इति अस्य मातुः आख्या। सन्ति पुनः नामधेयसादृश्यानि ।

**Q.V. (B) Translate *any one* group of verses into English :** **4**

**Group I**

(i) हीनसेवा न कर्तव्या कर्तव्यः महदाश्रयः ।
रामामासाद्य लङ्कायां लेभे राज्यं विभीषणः ।।

(ii) रोग-शोक-परीताप-बन्धन-व्यसनानि च ।
आत्मापराधवृक्षाणां फलान्येतानि देहिनाम् ।।

**Group II**

(i) कस्यापि कोऽप्यतिशयोऽस्ति स तेन लोके
ख्यातिं प्रयाति न हि सर्वविदस्तु सर्वे ।
किं केतकी फलति किं पनसः सुपुष्पः
किं नागवल्ल्यापि च पुष्पफलैरुपेता ।।

**Group I**

(i) सुवर्णपुष्पितां पृथ्वीं विचिन्वन्ति त्रयो जनाः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ।।

(ii) दंष्ट्रविरहितो नागो मदहीनो यथा गजः ।
सर्वेषां जायते वश्यो बलहीनस्तथा नृपः ।।

**Q.VI. Answer in English : (*Any two*)** **4**

(i) What are the factors responsible for adding beauty to a painting ?

(ii) How are नवरसs important even in painting ?

(iii) Why did डॉ. बाबासाहेब आंबेडकर want संस्कृत to be the national language ?

(iv) According to मार्कण्डेय, how should be the paintings of different types of people ?

**Q.VII. Complete the story.** **5**

यथा शरत्पूर्णिमा प्रकाशेन विशिष्यते सर्वासु रात्रिषु तथैव कार्तिकमासस्य अमावस्या ____________ विशिष्यते ____________ रजनीषु । ____________ रात्रौ स्वर्गायते खलु भूलोकः । स्थाने स्थाने प्रज्वालिताः दीपाः ____________ । श्रूयते यदस्मिन् दिने पुरा श्रीरामचन्द्रः रावणं ________ अयोध्यावासिभिः गृहाणि रथ्याः राजमार्गाः च परिमार्जिताः ।
(विलसन्ति, सर्वासु, हत्वा, अस्यां, तिमिरेण )

**OR**

**Make *any five* sentences in Sanskrit by using indeclinables / governing cases :**

(i) परितः (ii) अलम् (iii) प्रति
(iv) दा (v) नमः (vi) वि + तृ
(vii) स्पृह् (viii) रक्ष्

**Q.VIII. Solve *any five* sub-questions from the following :** **15**

**(A) Recognize *any three* of the following forms :**

(i) स्रोतःसु (ii) अस्माकम् (iii) मिलित्वा
(iv) चिक्षेप (v) जानासि

**(B) Dissolve and name the compounds : (*Any three*)**

(i) कृष्णसुवर्णम् (ii) सूर्यप्रकाशः (iii) प्रतिदिनम्
(iv) रक्तपक्षः (v) सुखदुःखयोः

**(C) Dissolve sandhis : (*Any three*)**

(i) वैद्योऽहम् (ii) रतस्यास्य (iii) यज्जालम्
(iv) युष्माभिर्यत् (v) तेनैव

**(D) Give Sanskrit antonym of the following words : (*Any three*)**

(i) अधः (ii) दूरतः (iii) प्रवेशः
(iv) विचारः (v) झटिति

**(E) Complete *any three* of the following sentences by choosing the suitable alternative given in the brackets :**

(i) बाल्य एव स ........... सह मृत्प्रतिमाः निर्मातुं प्रारभत । ( पित्रा / पित्रे / पिता )
(ii) मनो न मे ............... आयाति । (तृप्तिः / तृप्तिम् / तृप्त्या)

(iii) भगवान् सुगत एव ............ पिता । ( मां / अस्माकं / मह्यं )

(iv) ............... जैविकतैलं निर्मीयते । ( गोमयात् / अवकरात् / एरण्डबीजात् )

(v) किं कृतं ............ । ( तुभ्यम् / त्वया / त्वम् )

**(F) Do as directed : (*Any three*)**

(i) तैः ज्ञातम् आत्मिक्याः सम्पदः मूल्यम् । (Change the voice )

(ii) समुपागतवति मधुकरे दैवादवहेलां मा गाः । ( Remove absolute locative )

(iii) कृष्णः वेदान् वेत्ति । (सान्दीपनिः) (Make cuasal)

(iv) अधुना सङ्गणकोऽन्तर्जालं वा गृहे गृहे विद्यतेऽस्माकम् ।

(Use the compound word in place of underlined words.)

(v) भवान् सत्वरमुपचारं करोतु । (Use त्वम् in place of भवान्)

***Best Of Luck***

# MT - 172

2013 .... .... 1200

MT - 172 - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - PRELIM I - PAPER - IV

**Time : 3 Hours** **Preliminary Model Answer Paper** **Max. Marks : 80**

| | | |
|---|---|---|
| **A.I.** | **(A) Translate *any three* of the following passages into English :** | |
| (i) | Thereafter he sat on a swing below mango tree in the garden along with अनन्तभट्ट. When सोमशर्मा repeatedly asked about the medicines अनन्तभट्ट explained as to how diseases cause trouble. Seated on the swing, सोमशर्मा slowly fell asleep. सोमशर्मा who was suddenly awakened by a slight jerk said with hesitation, "Forgive me. I was so sleepy that, I don't know when I slept. Hence I was surprised/stunned. Will the respected one please narrate my cure (treatment) ?'' | **5** |
| (ii) | Once he went to a far-off village along with his colleagues. Before that, he had not been there. Before entering the village, Lerasiya wounded himself with blows of a whip. He also smeared the pulp of some herb to his own body, due to which his body became swollen, ugly and pitiable like the diseased one. He also smeared mud over that, due to which he appeared extremely sick. Thereafter, having entered that village with the colleagues, he went to the junction. There they all sat on the road. | **5** |
| (iii) | The inquisitive and thoughtful young नरेन्द्र was always engrossed in contemplation. Once, as asked by his mother, he purchased an idol of Goddess दुर्गा and came home. He knew that the festival of worship of Goddess दुर्गा was the worship of the Goddess of power. While returning home, he got engaged in thinking about the form of the Goddess of power. Suddenly, the series of his thoughts was broken by the sound of the feet of horses. He saw that the district-officer's cart is running with speed on the road. He tried to get away from the road for self-protection. | **5** |

| | | |
|---|---|---|
| (iv) | Just as there was a wish-granting tree in the ancient times, likewise, the internet is a knowledge-granting tree in the modern times. Whatever information the mind desires, it is fulfilled by this (internet) within a moment itself. The knowledge of various sciences and arts, world news, information about various organizations and departments, thousands of books, useful information for travel and reservation of seats, seeing and conversation with far-off people, general knowledge, etc. is available due to this technology. This modern wish-granting tree gives (offers) us all types of information. | **5** |
| (v) | Aditi : What are the रसs (sentiments) and emotions ? How is the manifestation of रस possible in drama ?<br>Teacher : Sage भरत says, just as food, containing six flavours, prepared by the right cooking process in the kitchen, becomes delicious, likewise in drama, an artistic composition containing various emotions becomes enjoyable and captivates the minds of the audiences. Thus, these specific emotions are known as रसs of drama.<br>Aditi : How many रसs exist ? What are their names ? | **5** |
| **A.I.** | **(B) Translate *any two* groups of verses into English :**<br>**Group I** | |
| (i) | Hearing that, Lord इन्द्र, in the disguise of the Brahmin, said to him, "If you understand this, then how is it that without learning and without education and training, you have started to accomplish success with penance and prayers?" This is like asking for horns of a rabbit or drawing a picture in the sky. | **4** |
| | **Group II** | |
| (i) | O lamp, protect the oil that enhances (your) illumination, because, indeed without that all your wicks will be reduced to ashes. [O valourous person, carefully place your affection which enhances your prosperity on the deserving, as without it your virtues will become ash (wasted / futile).] | **2** |

| | | |
|---|---|---|
| | **Explanation :** This verse contains a figure of speech called pun. (श्लेष) where one word has more than one meaning. The word स्नेह in case of the lamp is oil while with regards to man it is affection. The word पात्र means a vessel for the lamp while for the man it means a deserving person. गुण means thread or wick for the lamp but for the man it mean virtues. | |
| (ii) | The virtuous ones, who are dejected by others' sorrow, are not greedy for a rare thing and are merciful even towards the opponents, are like trees performing good deeds.<br>**Explanation :** The virtuous people are compared with trees or with good protectors or benevolent protectors who selflessly donate all of their possessions to even their opponents (those who cut them). | **2** |
| | **Group III** | |
| (i) | As long as the moon, sun and stars shall remain firm in the expanse of the sky, so long this Farooqi dynasty may succeed on the surface of the earth. | **2** |
| (ii) | Great poets don't face scarcity, even if all the people grasp everything from them as per their wish. The ocean even today is a treasure of gems even though innumerable gems have been taken away by people. | **2** |
| | **Group IV** | |
| (i) | (The flag is) red (saffron) due to sacrifice, green due to agriculture and white due to the success of scientists, may the soldier triumph, may the farmer triumph and may science triumph by whom even the tricoloured three colours were given to our national flag. I salute the tricoloured national flag several times which continuously reminds me of the success-stories of the great people. | **4** |

| | | |
|---|---|---|
| **A.II.** | **(A) Answer *any two* questions in English from group I and II each :** | |
| | **Group I** | |
| (i) | Crude oil is called black gold. It is a conventional source of energy. It is formed when a large number of dead animals, plants (fossils) are buried underneath the giant rocks. Due to intense heat and pressure, it assumes the form of liquid gas. This impure liquid fuel is called crude oil which is considered to be black gold. Its refinement is a very complex process. Through this, we get petrol, kerosene, grease etc. which is used for commercial purpose. | **2** |
| (ii) | At भरतपुर, Three hundred sixty six species of birds are found. Among them are landbirds, water (aquatic) birds, grass-eating birds. Many migratory birds come to भरतपुर i.e. Siberian cranes. चित्रबलाक (painted stork), चमसचञ्चूः (white spoonbill), हूपूपक्षी (Indian wood-pecker) live there happily. | **2** |
| (iii) | Near the city of अवन्ती, there was a penance grove. There was a famous Buddhist monastery there. Many monks lived there and practiced penance. They adhered to the precepts of Lord सुगत बुद्ध and followed the discipline of hermits. They considered the affectionate Lord as their father. Hence, whenever they faced any problem or trouble, they would approach the Lord for a solution. | **2** |
| | **Group II** | |
| (i) | One can acquire many things and attain success and joy by begging things from others, but such joy is meaningless. The poet says that real success and joy lies in achieving things with one's own hard work. Hard-earned success and joy are long-living. | **2** |
| (ii) | The poet says, a real friend who gives us love is not only like collyrium to the eyes, but also pleases the mind with his presence. Moreover, he stands by us through thick and thin. He never abandons us however bad may our situation be. But some people | **2** |

| | | |
|---|---|---|
| | pretend to be our friends during our prosperity, just because they wish to gain some benefit from us. Such friends aren't real friends. Hence, the poet says, calamity is the real test of a friend - व्यसने मित्रपरीक्षा भवति । | |
| (iii) | The poet describes the God with various epithets. He says that the God is all-pervading. He is the cause of all that is manifest, but he himself is non-manifest. The God is beyond all attributes, he is eternal. He is the Lord of all existences. | **2** |
| **A.II.** | **(B) Complete *any two* verses of the following :** | |
| (i) | ज्ञानेन **पुंसां सकलार्थसिद्धिर्ज्ञानादृते काचन नार्थसिद्धिः ।**<br>**ज्ञानस्य मत्वेति गुणान् कदाचिज्ज्ञानं न मुञ्चन्ति** महानुभावाः ॥ | **2** |
| (ii) | वंशभवो **गुणवानपि सङ्गविशेषेण पूज्यते पुरुषः ।**<br>**न हि तुम्बीफलविकलो वीणादण्डः प्रयाति** महिमानम् ॥ | **2** |
| (iii) | परोऽपि **हितवान्बन्धुर्बन्धुरप्यहितः परः ।**<br>**अहितो देहजो व्याधिर्हितमारण्य**मौषधम् ॥ | **2** |
| (iv) | धर्मः **सर्वसुखाकरो हितकरो धर्मं बुधाश्चिन्वते**<br>**धर्मेणैव समाप्यते शिवसुखं धर्माय तस्मै नमः ।**<br>**धर्मान्नास्त्यपरः सुहृद् भवभृतां धर्मस्य मूलं दया**<br>**धर्मे चित्तमहं दधे प्रतिदिनं हे धर्म मां** पालय ॥ | **2** |
| **A.II.** | **(C) Complete *any one* verse based on a metre :** | |
| (i) | **गीतिः** - समुपागतवति दैवादवहेलां कुटज मधुकरे मा गाः ।<br>मकरन्दतुन्दिलानामरविन्दानामयं महामान्यः ॥ | **2** |
| (ii) | **उपेन्द्रवज्रा** - अहो महत्त्वं महतामपूर्वं विपत्तिकालेऽपि परोपकारः ।<br>यथाऽऽस्यमध्ये पतितोऽपि राहोः कलानिधिः पुण्यचयं ददाति ॥ | **2** |
| **A.III.** | **(A) Write 5 sentences in Sanskrit on *any one* topic given below:** | |
| (i) | **स्वातन्त्र्यदिवसः**<br>प्रतिवर्षं ऑगस्टमासस्य पञ्चदशदिनाङ्के सम्पूर्णभारतवर्षे अयमुत्सवः मान्यते । १९४७ | **5** |

| | | |
|---|---|---|
| | तमे वर्षे अस्मिन्नेव दिने अस्माकं राष्ट्रं परकीयबन्धनात् विमुक्तम् अभवत् । दिल्लीनगरे लालकिलादुर्गे प्रधानमन्त्रिमहोदयः ध्वजारोहणं करोति । ततः सर्वे मिलित्वा राष्ट्रगीतं गायन्ति । प्रतिनगरमपि ध्वजारोहणं भवति । अस्माकं पूर्वजैः महता प्रयत्नेन त्यागेन च यत्स्वातन्त्र्यं सम्पादितं तस्य रक्षणार्थम् अस्माभिः सदैव यतितव्यम् । एतस्य दिवसस्य महत्त्वं अस्माभिः सर्वैः अवश्यं ज्ञातव्यम् । नमो भारतराष्ट्राय । | |
| (ii) | **आकाशवाणी** | |
| | विज्ञानस्य प्रभावः वयं सर्वत्र द्रष्टुं शक्नुमः । आकाशवाणी नाम विज्ञानस्य एकः आविष्कारः । लोहसूत्ररहितस्याः आकाशवाण्याः आविष्कारः मार्कोनीमहोदयेन कृतः। ध्वनेः तरङ्गाः आकाशे सञ्चरन्ति । ते तरङ्गाः विद्युद्यन्त्रेण गृहीताः तेन । तदनन्तरम् आकाशवाण्याः अविष्कारः जातः । भारते आकाशवाणीद्वारा शिक्षायाः प्रचारः प्रसारः च सुलभरीत्या भवति । आकाशवाण्यां वयं न केवलं गीतानि, वार्ताः अपि तु क्रीडानां धावत् सूत्रसंचलनम् अपि श्रोतुं शक्नुमः । आकाशवाण्यां सम्पूर्णं जगत् ग्रामवत् लघु अभवत् । | **5** |
| (iii) | **सुभाषितम्** | |
| | सुभाषितं नाम शोभनं भाषितम् । संस्कृतभाषायां बहूनि सुभाषितानि सन्ति । एतानि सुभाषितानि मधुराणि गेयानि च । अल्पाक्षराणि तथापि महान्तम् अर्थं सूचयन्ति । सुभाषितानां विषयाः भिन्नाः । सुभाषितानां पठनेन वाणी सुसंस्कृता निर्दोषा च भवति । निबन्धलेखनार्थं, वक्तृत्वकलानैपुण्यसम्पादनार्थं तानि अतीवोपयुक्तानि । तानि अस्मभ्यं शाश्वतमानन्दं यच्छन्ति । | **5** |
| | **OR** | |
| | **Translate *any five* sentences in Sanskrit :** | |
| (i) | तस्याः अभिनयः कृत्रिमः प्रतिभाति / भासते / प्रतीयते । | **1** |
| (ii) | (त्वं) तव भ्रातुः नाम वद । | **1** |
| (iii) | वयं वृक्षस्य छायायां उपवेक्ष्यामः । | **1** |
| (iv) | सिंहः पशूनां राजा अस्ति । | **1** |
| (v) | नद्याः जलं / नदीजलं निर्मलं वर्तते / अस्ति । | **1** |
| (vi) | त्वं कदा ग्रामं गमिष्यसि ? | **1** |
| (vii) | (त्वं) धूर्तशृगालस्य कथां कथय । | **1** |
| (viii) | सेनाप्रमुखः व्यूहं रचयति । | **1** |
| **A.IV.** | **(A) Rewrite the following sentences according to the order :** | |
| (i) | अस्ति कोङ्कणप्रदेशे रायगडजनपदे कश्चिद् ग्रामः सासवणेनाम । | **1** |
| (ii) | समुद्रं निकषा एवाध्युषितं प्रकृतिरम्यस्थलं ननु । | **1** |

| | | |
|---|---|---|
| (iii) | तत्र वर्तते नयनरम्यः चित्ताकर्षकः करमरकर शिल्पालयः । | 1 |
| (iv) | नैतत् केवलं ग्रामभूषणं परं कलावतां तथैव कला रसिकानां कृते पण्ढरपुरमिव तीर्थक्षेत्रम् । | 1 |
| (v) | ग्रामेऽस्मिन् पाण्डुरङ्गकरमरकरनाम्नः कृषीवलस्य सङ्गीत-चित्र-कलादिभिः परिपूर्ण, शान्तिसुखयोः निधानमेव गृहमासीत् । | 1 |
| | **OR** | |
| | **Answer *any five* question in Sanskrit :** | 1 |
| (i) | **कोयना-जल-विद्युत्प्रकल्पः** अर्वाचीनमहाराष्ट्रस्य भाग्यरेषा । | 1 |
| (ii) | **अलिबागमण्डलाधिकारी ऑटोरॉथफिल्डमहोदयः** ग्रामव्यवस्थापननिरीक्षणार्थं आगतः । छत्रपतिशिवरायस्य चित्रं दृष्ट्वा प्रहृष्टेन मनसा तेन **विनायकः मुंबईस्थितं जे. जे. महाविद्यालयं प्रवेशितः** । | 1 |
| (iii) | पिकाः **आम्रवृक्षे** वर्तन्ते । | 1 |
| (iv) | **अवन्तीनगरात् बहिः विशाले रमणीये तपोवने** बौद्धविहारः आसीत् । | 1 |
| (v) | 'जयतु विज्ञानम्' इति वक्तुं कवयित्रीं **भावोत्कटता** मुखरयते । | 1 |
| (vi) | **गजनीनरेशः** फारुकी-कुलावतंसः बभूव । | 1 |
| (vii) | आर्येषु सङ्गतं **पूर्वम् अणु (लघु), पश्चात् च बृहत्** भवति । | 1 |
| (viii) | धर्मस्य मूलं **दया** अस्ति । | 1 |
| **A.V.** | **(A) Translate *any one* unseen passage / dialogue into English :** | |
| (i) | This age is competitive. Competitions have a great significance for progress in life. With competition alone, a man ascends the path of progress. Competitions are necessary for arousing those talents within children, which are generally dormant. In studenthood, when children participate in various competitions like elocution, essay writing, drawing, debate, sports, etc., their abilities are honed due to these (competitions). Hence, for holistic (all-round) development in life, one should participate in competitions. | 5 |
| (ii) | Poor - O King ! Shiva's death commenced hundred years ago. Now, it will end in a short while.<br>King - Surprising ! How is it possible ?<br>Poor - Listen O King ! He is indeed the form of Hari and Hara. Hence, half body is Hari that is Lord Vishnu has taken.<br>King - The remaining half ? | 5 |

| | | |
|---|---|---|
| | Poor - Further he is also अर्धनारीश्वर hence, Goddess Parvati has taken the other half. | |
| (iii) | ( The one having a clay-peacock in hand having entered )<br>Lady ascetic - O! Sarvadaman (one who suppresses all), behold the beauty of the bird.<br>Child - (With a glance) Where is my mother ?<br>Both - The beloved of mother is deceived due to the similarity of the name.<br>Second one - O! Child, I say, you see the beauty of this clay - peacock.<br>King - ( to himself ) Is it that the name of this one's mother is Shakuntala ? Again, there are similar names. | **5** |
| **A.V.** | **(B) Translate *any one* group of verses into English :**<br>**Group I** | |
| (i) | One should not serve the inferior (wicked/unworthy) but one should always resort to the excellent. Approaching Lord Rama, Vibhishana got the kingdom of Lanka (लंका). | **2** |
| (ii) | Disease, grief, agony, bondage and calamities are the fruits of the trees in the form of people's own sins.<br>**Explanation :** As you sow so shall you reap. What goes around comes around. | **2** |
| | **Group II** | |
| (i) | Someone has something in excess by which he attain fame in the world; Indeed everyone is not all knowing (omniscient). Does the केतकी bear fruit ? Does the jack fruit flower is the betel leaf endowed with flower or fruit. | **4** |
| | **Group III** | |
| (i) | Three people who select (gather) the earth blossomed with golden flowers (are) the brave, the educated and one who knows to serve. | **2** |

| | | |
|---|---|---|
| (ii) | Just as a snake without fangs, an elephant without ichor (pride, rut) likewise, a king without power comes under the control of all. | **2** |
| **A.VI.** | **Answer in English : (*Any two*)** | |
| (i) | Generally, lines, shape, light and shade are important factors in any drawing. If somebody has imitated any picture then it has to resemble the original one. Position, degree proportion sweetness, size of land, differences, resemblance, drawing pictures in small or big size to indicate their proximity or distance are the eight factors that add to the beauty of a painting. | **2** |
| (ii) | नवरसs are the nine poetic sentiment that an artist generates through his emotions, writing. As proportion of images is necessary for beautiful picture likewise those images should reflect the emotions. The नवरस i.e. nine poetic sentiments like शृङ्गार, वीर, करुण etc. should be present in the picture which makes the picture vibrant. It appears very real. These emotions should be drawn by various postures and gestures of body. Such a picture becomes effective and impressive. | **2** |
| (iii) | डॉ. बाबासाहेब आंबेडकर was fond of Sanskrit language. He also knew the importance of Sanskrit which was the language of the Gods. Therefore he wanted Sanskrit to be a national language like Hindi. In order to do so, he first put forth the proposal in the executive meeting of 'Dalit Mahasangh'. He firmly believed that the root of Indian culture were in Sanskrit. Many Indian languages originate from Sanskrit. As it is revered by scholars and it deserves to be the national language. | **2** |
| (iv) | Sage मार्कंडेय has talked about various signs. There are different codes for people of different nature. Like, the eyebrows of a calm person should be like crescent moon whereas of a dancer, they should be in bow like shape. The images of deities should have various ornaments. Their faces should be pleased, charming | **2** |

| | | |
|---|---|---|
| | whereas their attires should be of silk etc. The images of sages, seers should be with hair locks, bark. They should look weak but lustrous. | |
| **A.VII.** | **Complete the story.** | |
| | यथा शरत्पूर्णिमा प्रकाशेन विशिष्यते सर्वासु रात्रिषु तथैव कार्तिकमासस्य अमावस्या **तिमिरेण** विशिष्यते **सर्वासु** रजनीषु । **अस्यां** रात्रौ स्वर्गायते खलु भूलोकः । स्थाने स्थाने प्रज्वालिताः दीपाः **विलसन्ति** । श्रूयते यदस्मिन् दिने पुरा श्रीरामचन्द्रः रावणं **हत्वा** अयोध्यावासिभिः गृहाणि रथ्याः राजमार्गाः च परिमार्जिताः । | **5** |
| | **OR** | |
| | **Make *any five* sentences in Sanskrit by using indeclinables / governing cases :** | |
| (i) | **गृहं परितः** क्रीडाङ्गणं वर्तते । | **1** |
| (ii) | **अलं विवादेन** । | **1** |
| (iii) | **जननीं प्रति** शिशुः धावति । | **1** |
| (iv) | वृक्षः जनेभ्य **छायां यच्छति** । | **1** |
| (v) | **शङ्कराय नमः** । | **1** |
| (vi) | **वितरति** गुरुः **प्राज्ञाय** / **प्राज्ञे** विद्यां यथैव तथा जडे । | **1** |
| (vii) | बालिका **कुण्डलाय स्पृहयति** । | **1** |
| (viii) | देवः भक्तान् **सङ्कटात् रक्षति** । | **1** |
| **A.VIII** | **Solve *any five* sub-questions from the following :** | |
| **(A)** | **Recognize *any three* of the following forms :** | |
| (i) | स्रोतःसु - स्रोतस् noun ending in स्<br>Neuter gender<br>Locative plural. | **1** |
| (ii) | अस्माकम् - अस्मद् First person pronoun<br>Common in all genders<br>Genitive plural. | **1** |
| (iii) | मिलित्वा - Root मिल् (6 PP)<br>Gerund त्वान्त अव्यय. | **1** |

| | | | | | | |
|---|---|---|---|---|---|---|
| (iv) | चिक्षेप | - | Root क्षिप् (6 UP) here PP<br>Perfect past tense<br>Third person singular. | | | 1 |
| (v) | जानासि | - | Root ज्ञा (9 UP) here PP<br>Present tense<br>Second person singular. | | | 1 |
| **(B)** | **Dissolve and name the compounds : (*Any three*)** | | | | | |
| (i) | कृष्णसुवर्णम् | - | कृष्णं सुवर्णम् । | - | कर्मधारय समास । | 1 |
| (ii) | सूर्यप्रकाशः | - | सूर्यस्य प्रकाशः । | - | षष्ठी तत्पुरुष समास । | 1 |
| (iii) | प्रतिदिनम् | - | दिने दिने । | - | अव्ययीभाव समास । | 1 |
| (iv) | रक्तपक्षः | - | रक्तः पक्षः यस्य सः । | - | बहुव्रीहि समास । | 1 |
| (v) | सुखदुःखयो | - | सुखं च दुःखं च, तयोः । | - | इतरेतर द्वन्द्व समास । | 1 |
| **(C)** | **Dissolve sandhis : (*Any three*)** | | | | | |
| (i) | वैद्योऽहम् | - | वैद्यः + अहम् । | | | 1 |
| (ii) | रतस्यास्य | - | रतस्य + अस्य । | | | 1 |
| (iii) | यज्जालम् | - | यत् + जालम् । | | | 1 |
| (iv) | युष्माभिर्यत् | - | युष्माभिः + यत् । | | | 1 |
| (v) | तेनैव | - | तेन + एव । | | | 1 |
| **(D)** | **Give Sanskrit antonym of the following words : (*Any three*)** | | | | | |
| (i) | अधः | × | उपरि । | | | 1 |
| (ii) | दूरतः | × | अन्तिके, निकटे, समीपे । | | | 1 |
| (iii) | प्रवेशः | × | निकासः । | | | 1 |
| (iv) | विचारः | × | अविचारः । | | | 1 |
| (v) | झटिति | × | शनैः शनैः । | | | 1 |
| **(E)** | **Complete *any three* of the following sentences by choosing the suitable alternative given in the brackets :** | | | | | |
| (i) | बाल्य एव स **पित्रा** सह मृत्प्रतिमाः निर्मातुं प्रारभत । | | | | | 1 |
| (ii) | मनो न मे **तृप्तिम्** आयाति । | | | | | 1 |
| (iii) | भगवान् सुगत एव **अस्माकं** पिता । | | | | | 1 |

| | | |
|---|---|---|
| (iv) | **एरण्डबीजात्** जैविकतैलं निर्मीयते । | 1 |
| (v) | किं कृतं **त्वया** । | 1 |
| **(D)** | **Do as directed : (*Any three*)** | |
| (i) | **ते** आत्मिक्याः सम्पदः **मूल्यं ज्ञातवन्तः** । | 1 |
| (ii) | **यावत् मधुकरः समुपागतवान् तावत्** दैवादवहेलां मा गाः । | 1 |
| (iii) | **सान्दीपनिः कृष्णं** वेदान् **वेदयति** / **वेदयते** । | 1 |
| (iv) | अधुना सङ्गणकोऽन्तर्जालं वा **प्रतिगृहं** विद्यते । | 1 |
| (v) | **त्वं** सत्वरमुपचारं **कुरु** । | 1 |

❖❖❖❖